# का शि का

## पञ्चमोऽध्यायः

## प्रथमः पादः

### प्राक्क्रीताच्छः । (१/१६६१)

'तेन क्रीतम्' (५.१.३७/१७०२) इति वक्ष्यति । प्रागेतस्मात् क्रीतसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामः छप्रत्ययस्तेष्वधिकृतो वेदितव्यः । वक्ष्यति 'तस्मै हितम्' (५.१.५/१६६५) इति । वत्सेभ्यो हितः वत्सीयो गोधुक् । करभीयः [1]उष्ट्रः । अकरभीयः । [2]अवत्सीयः । अर्थोऽवधित्वेन गृहीतः, न प्रत्ययः । तेन प्राक् ठञः [3]छः इति नोक्तम् ॥

### उगवादिभ्यो यत् । (२/१६६२)

प्राक् क्रीतात् इत्येव । उवर्णान्तात् प्रातिपदिकात् [4]गवादिभ्यश्च यत् प्रत्ययो भवति प्राक्क्रीतीयेष्वर्थेषु । छस्यापवादः। शङ्कव्यं दारु । पिचव्यः कार्पासः । [5]कमण्डलव्या मृत्तिका । गवादिभ्यः खल्वपि – गव्यम् । [6]हविष्यम् । [7]सनङ्गुर्नाम चर्मविकारः। ततः परत्वात् 'चर्मणोऽञ्' (५.१.१५/१६७७) इत्येष विधिः प्राप्नोति । तथा चरुर्नाम [8]हविः, सक्तुरन्नविकारः । अपूपादिषु '[9]अन्नविकारेभ्यश्च' (ग.सू.१०९) इति पठ्यते । ततो 'विभाषा हविरपूपादिभ्यश्च' (५. १. ४/१६६४) [10]इत्येष विधिः प्राप्नोति । [11]तत्र सर्वत्र पूर्वविप्रतिषेधेन [12]यत्प्रत्यय एवेष्यते, [13]सनङ्गव्यं चर्म, चरव्यास्तण्डुलाः, सक्तव्या धानाः इति । गवादिषु '[14]नाभि नभं च' (ग.सू.१०६) इति पठ्यते । [15]तस्यायमर्थः । नाभिशब्दो [16]यत्प्रत्ययमुत्पादयति [17]नभं चादेशमापद्यते [18]इति । नाभये हितः नभ्यो[19]ऽक्षः । नभ्यमञ्जनम् । यस्तु शरीरावयवो नाभिशब्दः, ततः 'शरीरावयवाद्यत्' (५.१.६/१६६६) इति यति कृते, नाभये हितं नाभ्यं तैलम् इति[20] भवितव्यम् । गवादिषु यता सन्नियुक्तो नभभावोऽत्र न भवति ।

गो । हविस् । बर्हिष् । [21]खट । [22]अष्टका । [22]युग । मेधा । स्रक् । 'नाभि नभं च' (ग.सू.१०६) । 'शुनः सम्प्रसारणं वा च दीर्घत्वं तत्सन्नियोगेन [24]चान्तोदात्तत्वम्' (ग. सू. १०७) । शुन्यं, शून्यम् । [25]चकारस्यानुक्तसमुच्चयार्थत्वात् नस्तद्धिते (६.४. १४४/६७९) इति[26]लोपो न स्यात् । 'ऊधसोऽनङ् च' (ग.सू.१०८) । [27]ऊधन्यः कूपः । [28]खर । स्खद । अक्षर । विष । गवादिः ॥

---

1. उष्ट्रः नास्ति ब. क. 2. अवत्सीयः नास्ति ड. 3. छः नास्ति ह. 4. गवादेश्च क. इ. 5. उदाहरणमिदं नास्ति ब. 6. हविष्यम् नास्ति ब. 7. शलङ्कु क. 8. हविर्विशेषः क. 9. अन्नविकारे च ग. 10. इति विकल्पः फ. 11. तत्र नास्ति फ. 12. यत् एव फ. 13. शलङ्कव्यम् क. 14. नाभि नभं च नास्ति क. 15. तत्रायमर्थः क, नास्ति ब. 16. यत् नास्ति क, यतं ब. फ. 17. नभभावं चापद्यते ब. क. 18. इति नास्ति फ. 19. वृक्षः ब. क. 20. एव इत्यधिकम् फ. 21. खट नास्ति ब. क. फ. 22. अष्टक ह. 23. संयुग ह. 24. च तस्यान्तोदात्तत्वम् क. फ. 25. वाक्यमिदं नास्ति क. फ. ह. 26. टिलोपः ड. 27. ऊधस्यम् । अक्ष बदर खर स्मय विश्व गवादिः क, अक्षर उदर वेद स्कन्द अध्व विष ब. 28. स्थल ह.